श्री आदित्य द्वादशनाम स्तोत्रं

श्री आदित्य द्वादशनाम स्तोत्रं

आदित्यः प्रथमं नामं द्वितीयं तु दिवाकरः |
तृतीयं भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः || 1 ||

पंचमं तु सहस्रांशुः षष्ठं चैव त्रिलोचनः |
सप्तमं हरिदश्वश्च अष्टमं तु विभावसुः || 2 ||

नवमं दिनकृत् प्रोक्तं दशमं द्वादशात्मकः |
एकादशं त्रयीमूर्तिर्द्वादशं सूर्य एव च || 3 ||

द्वादशादित्यनामानि प्रातः काले पठेन्नरः |
दुःस्वप्नो नश्यते तस्य सर्वदुःखं च नश्यति || 4 ||

दद्रुकुष्ठहरं चैव दारिद्र्यं हरते ध्रुवं |
सर्वतीर्थकरं चैव सर्वकामफलप्रदं || 5 ||

यः पठेत् प्रातरुत्थाय भक्त्या स्तोत्रमिदं नरः |
सौख्यमायुस्तथारोग्यं लभते मोक्षमेव च || 6 ||

इति श्री आदित्य द्वादशनाम स्तोत्रं |